

MAHESACHANDRA
NYAYARATNA

BRIEF NOTES ON THE
MODERN NYAYA SYSTEM
OF PHILOSOPHY AND ITS
TECHNICAL TERMS

BRIEF NOTES ON THE MODERN NYAYA SYSTEM OF PHILOSOPHY AND ITS TECHNICAL TERMS.

BY

MAHÁMAHOPÁDHYAY MAHEŚA CHANDRA NYÁYARATNA, C. I. E.

HARE PRESS: CALCUTTA.

Brief Notes on the Modern Nya'ya System of Philosophy and its Technical Terms.

THE term Nyáya is composed of नि (with certainty), इ or अय (to go) and अ (by which), and means literally the method of coming with certainty [to a conclusion]. As used in Hindu Philosophy it means the syllogism. Gotama is the earliest writer who treats of the syllogism; and his work, the Gautama-Sutra (aphorisms of Gotama), and those of writers who discuss philosophical questions according to his method, whether they discuss the syllogism or not, make up the Nyáya system of philosophy.

Nyáya philosophy may be divided into ancient and modern. Ancient Nyáya treats not only of the syllogism, but discusses all sorts of questions, physical and metaphysical, applying, where necessary, the syllogistic method. Modern Nyáya, as regards the subjects of discussion, makes no departure from the ancient. Rather, it restricts itself to fewer subjects;

but those it discusses, it discusses with a nicety and a minute precision unknown to ancient Nyáya. It lays particular stress on a strict definition of terms, and it aims at ascertaining precisely even the meanings of expressions in common use and so intelligible to all. For example, Gotama, in putting forth his aphorism, "साध्यनिर्द्देशः प्रतिज्ञा" (I. 1-2-3.) does not think it necessary that he should attempt any elucidation of the meaning of the term प्रतिज्ञा। His earlier commentators too, Pakshila Svámin and others, make no such attempt. Gangesa Upádhyáya, the founder of the modern school of Nyáya, enters upon a lengthy discussion about the meaning of प्रतिज्ञा, remarking that साध्यनिर्द्देश is inadequate as a characteristic of प्रतिज्ञा, for, साध्यनिर्द्देश might be understood as simply meaning,—naming the साध्य. He notices also other points. He puts forth the following as the characteristic of प्रतिज्ञा —

उद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सति उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यं प्रतिज्ञा।

Raghunátha Siromani improves upon the above thus :—

प्रकृतन्यायावयवत्वे सति प्रकृतानुमितिपक्षविशेष्यकप्रकृतानुमितिसाध्यप्रकारकप्रकृतानुमितिपक्षविशेष्यतानिरूपितप्रकृतसाध्यप्रकारताविलक्षणविषयताशून्यशब्दज्ञानजनकं वाक्यं प्रतिज्ञा।

Then follows Gadádhara, who discusses the question at greater length than his predecessors, bringing out several nice points, and comes at last to the following conclusion :—

"पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारताकानुमितिप्रयोजकन्यायावयवत्वे सति पक्षतावच्छेदका-

न्नाच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्न प्रकारताकपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्न-साध्यतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नानिवर्त्त्यसंशयनिवर्त्तकतावच्छे-दकविषयताशून्यशाब्दज्ञानजनकं वाक्यं प्रतिज्ञा ।"

An old Nyáya work lays down अव्यभिचरितत्व or अविनाभाव (invariable connection) as the characteristic attribute of व्याप्ति।

Gangesa Upádhyáya thinks this characterisation insufficient, and so he delivers himself as follows :—

"प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः ।"

Raghunátha Siromani improves upon Gangesa's elucidation thus :—

"निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्व-यद्धर्म्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्म्मावच्छिन्नस्य व्यापकत्वं। व्यापकसामानाधिकरण्यं व्याप्तिः ।"

He is followed by Bhaváananda, Mathuránátha, Jagadisa and Gadádhara, each with some improvement of his own. Jagadísa's conclusion is as follows :—

स्वावच्छेदकतावटकसम्बन्धेन यादृशप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नानधिकरणं हेत्वधिकरणं तादृशप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नावच्छेदकताकत्व-यद्धर्म्मावच्छिन्नावच्छेदकताकत्वोभयाभावस्तेन सम्बन्धेन तद्धर्म्मावच्छिन्नसामानाधिकरण्यं व्याप्तिः ।

A hair-splitting subtlety in the discussion of meanings of terms is, thus, the distinguishing characteristic of modern Nyáya. Poverty of matter is its great drawback. Notwithstanding this drawback, however, it is an excellent training

for the intellect, which, under its discipline, acquires a power of precise thinking that is beyond all price. Without a study of modern Nyáya it is impossible, again, to thoroughly understand certain Sanskrit works on Philosophy, Law, Rhetoric and even Grammar; for example, the *Chitsukhi*, a commentary by Chitsukhácháryya on *Nyáyamakaranda* (a treatise on the Vedanta philosophy by A'nandabodha), the *Dáyabhágaprabodhini*, a commentary by Srikrishna Tarkálanka'ra on *Dáyabhága* (a treatise on the Hindu Law of Inheritance), the *Kávyaprakásádarsa*, a commentary by Mahesvara Nya'ylanka'ra on *Kávyaprakása* (a work on Rhetoric), and *Paribhásendusekhara* and *Manjusa* (works on Grammar) by Na'gesa Bhatta.

The *Sutras* of Gotama, the *Bháshya* of Pakshila Sva'min, the *Va'rtika* of Udyotaka'ra A'cha'ryya, the *Tátparyya-tiká* of Va'chaspati Misra, the *Tátparyya-tiká-Prasuddhi* of Udayana A'cha'ryya fall under the head of ancient Nya'ya. The works on Vaiseshika philosophy, with the exception of a few, such as *Muktávali*, may also be included under the same head. All the works on Nyáya from Gangesa's, who lived probably in the 14th century, down to Gada'dhara's, who lived in the latter end of the 17th century, come under the head of modern Nya'ya.

Gangesa Upa'dhya'ya was a native of Mithila' (north-eastern Beha'r). He founded the modern school of Nya'ya. His great work is the *Tattva-Chintámani* of which the subject is प्रमाण (proof), one of the sixteen categories laid down by Gotama in his Sutras. The system introduced by him received further development at the hands of his disciples, among whom was

his own son Vardhama'na Upa'dhya'ya, up to the time of Pakshadhara Misra, who flourished in the middle of the 15th century. He was the writer of a commentary called *Aloka* on Gangesa's *Tattva-Chintámani*. Down to the time of Pakshadhara the study of modern Nya'ya was almost exclusively confined to Mithila, which became the resort of pupils from all parts of India. The literary activity of the Mithila' school began to decline after the time of Pakshadhara, whose work called *A'loka* is the last standard work on modern Nya'ya. The school, however, continued to flourish, and it is not yet extinct in Mithila'. It may be noticed here incidentally that the works of Gangesa and his followers effected a revolution in the study of Nya'ya and completely superseded the ancient Nya'ya works, such as the *Bháshya*, the *Va'rtika*, &c., so much so that very few Pandits of the present day possess even copies of these works.

From Mithila' the study of modern Nya'ya spread to Navadvipa (Nadiya', the same as Nuddea), and the students who had studied the subject in Mithila began to teach it to their pupils in the latter place. The name of the Pandit who first introduced the study of modern Nya'ya into Navadvipa can not be ascertained. Ra'mabhadra Siddha'ntava'gisa is the earliest Nadiya' writer on Nya'ya of whom we have any certain knowledge. He wrote a commentary on the *Kusuma'njali* of Udayana A'cha'ryya. The image of the goddess Ka'li, known as "Poda'-Ma'" (burnt mother) in consequence of its having been burnt once, and to which offerings are made by students on the eve of their departure from Navadvipa after the completion of their studies there, is said to have been set up for worship by Ra'mabhadra. After Ra'mabhadra came

Basudeva Sa'rvabhauma. He was the writer of a work on Nya'ya which is now missing but is referred to in other works on Nya'ya. Raghuna'tha Siromani, the writer of the celebrated *Didhiti* which, though calling itself a commentary on the chapters on *Anumána* (inference) in the *Tattva-Chintámani*, contains a great deal of valuable original matter, was a pupil of Ba'sudeva Sa'rvabhauma, and, according to tradition, a contemporary of Chaitanya, the celebrated Vaishnava reformer. In his hands the system of Gangesa received its fullest development, and from his time the fame of the Nadiya school began to increase until at last the Mithila school was completely thrown into the shade, yielding thus to its rival the place which it formerly occupied. The Naiya'yikas of Nadiya have ever since maintained this position—a postion recognised by Pandits all over India. After Raghuna'tha came in succession Bhava'nanda Siddha'ntava'gisa, Mathura'na'th Tarkava'gisa, Ja'ga'disa Tarka'lanka'ra and Gada'dhara Bhatta'cha'ryya. The descendants of the last have been distinguished Naiya'yikas, and the greatest living Professor of Nya'ya at Nadiya', Maha'-mahopa'dhya'ya Bhuvana Mohana Vidya'ratna, is the sixth in descent from Gada'dhara. Another Bengali Naiya'yika, Krishnada'sa Sa'rvabhauma but whether of Nadiya' or not is not known, wrote a commentary on the *Didhiti*, named the *Didhiti Prasárini* of which a MS. copy written in Samvat 1672, corresponding to the year 1615 of the Christian era, exists in the Government Sanskrit College in Calcutta.

All these Nadiya writers wrote commentaries on the *Didhiti*, Mathura'na'tha writing a full commentary on the *Chinta'mani* besides, and they enlarged the technical terminology of modern Nyaya. To give an example. The terms द्वि and द्वित्ववत् both

imply duality, but while the former can never be predicated of a single individual, the latter can. We cannot say, "अयं द्वौ," but can say "अयं द्वित्ववान्," so that द्वौ and द्वित्ववान् cannot have the same meaning. A distinction between the two meanings is made thus:—The idea of duality, as expressed by द्वि, requires for its completion (पर्य्याप्ति) an aggregate of two objects. Therefore द्वि cannot be predicated of a single object अयं। But the idea of duality, as expressed by द्वित्ववान् and meaning, 'belonging to an aggregate of two', and therefore not requiring for its completion the aggregate of two objects but requiring only one of them, can be predicated of a single object अयं. The former class of predication is based on what is called पर्य्याप्तिसम्बन्ध (relation of completion), and the latter on समवायसम्बन्ध (ordinary relation between object and attribute).

The technicalities of modern Nyáya have hitherto repelled students of Sanskrit from its study. The immemorial practice has been for Naiyáyikas to explain verbally to their pupils the meaning of each term as it turns up in the course of their teaching, and the explanations are after certain set formulæ. A book called the Nyáya-kosha was brought out in Bombay by Bhimácharyya Jhalakikar in 1875, and this book is a Dictionary of the Technical terms used in Nyáya. The explanations it gives are, however, not full enough, and the work itself has not yet come to be generally known. I purpose, therefore, in this paper to explain some of these technicalities, and this in simple Sanskrit, as I cannot hope to be able to make matters equally clear through the medium of English. My method of interpretation is not the orthodox one usually followed by Pandits, which I have thought proper to abandon as it is not one calculated to make matters quite intelligible.

I have had very little time to spare for writing this paper, Dr. Leitner's request to me for a paper having come to me only on the 30th June last. With more time at my disposal I would have made my paper fuller. I have not been able even to look over the proof-sheets carefully, owing to the serious and, as it has now proved, fatal illness of my eminent and revered friends Dr. Rajendralála Mitra and Pandit Iswara Chandra Vidyáságara.

धर्म्मः—ध्रियते तिष्ठति वर्त्तते यः स धर्म्मः। आकाशादिकं विना सर्व्व एव पदार्थाः यत्र-कुत्रचिदपि वर्त्तन्ते इति सर्व्व एव 'धर्म्माः' इत्युच्यन्ते। यत्र यो वर्त्तते स तस्य धर्म्मः। यथा द्रव्ये जातिगुणकर्म्माणि तिष्ठन्तीति जाति गुण-कर्म्माणि द्रव्यस्य धर्म्माः; सूत्रादौ अवयवे पटादि अवयवि द्रव्यं तिष्ठतीति द्रव्यमपि पटादि सूत्रादेर्धर्म्मः। 'पात्रे जलं वर्त्तते' इति पात्रस्य धर्म्मो जलम्। आकाशादिकन्तु न कुत्रापि वर्त्तते इति आकाशं न कस्यापि धर्म्मः। अतएव 'आकाशम्' 'अवृत्तिपदार्थः' इत्युच्यते।

धर्म्मश्च प्रथमतो द्विविधः, जातिरुपाधिश्चेति। येन परस्परं विभिन्नरूपाणामपि एकजातीयद्रव्याणाम् एकश्रेण्यामन्तर्भावो भवति स धर्म्मो जातिः। यथा विभिन्नदेशीयाः मनुष्याः विभिन्नाकाररूपस्वभावा अपि एकया मनुष्यत्वजात्या एकश्रेण्यामन्तर्भाविताः। जातिश्च सामान्यं नाम कणादोक्तश्चतुर्थः पदार्थः।

उपाधिरपि पुनः सखण्डोपाधि-रखण्डोपाधिश्चेति द्विविधः। खण्डेन (अंशेन) सह वर्त्तते इति सखण्डः; यश्च अंशतो विभक्तुं शक्यते स सखण्डोपाधिर्धर्म्म इति यावत्। यथा पशुत्वं; तद्धि लोमवल्लाङ्गूलवत्त्वम्। ततश्च तस्य लोमलाङ्गूलादयः अंशा बहवो वर्त्तन्ते इति द्रव्यरूपं पशुत्वं धर्म्मः सखण्डोपाधिः। एवं 'रूपवान् अयं' इत्यत्र गुणात्मकं रूपं धर्म्मः; स च सखण्डोपाधिः; रूपत्वजातेराश्रयो हि रूपम्, ततश्च रूपस्य रूपत्वजातिः आश्रयश्चेति अंशद्वयमस्ति।

यस्य अंशविशेषो नास्ति, मनुष्यत्व-द्रव्यत्वादि-जातिवत्, यस्तु अंशतो विभक्तुं न शक्यते, अंशरहितत्वमेव यस्य स्वरूपमङ्गीक्रियते स अखण्डोपाधिः। यथा भावत्वं, तद्धि अभावत्वविरोधी कश्चन धर्म्मः इति, पशुत्वादिवत् भावत्वम् अंशतो विभक्तुं नशक्यते।

जातेरपि अंशविभागो नास्ति। किन्तु जातेः समवायसम्बन्धेन सत्त्वं नियमम्, अखण्डोपाधेस्तु न तथा तस्य स्वरूपसम्बन्धेन सत्त्वम्,—इत्यनयोः पृथगुल्लेखः।

जातेरखण्डोपाधेश्च प्रतीतावनुल्लेखे (शब्देन अनुच्चारणे) निरवच्छिन्ना (तयोर्विशेषणप्रतीतिरहिता) प्रतीतिर्भवति। यथा 'पटो भावः' इति प्रतीतौ पटत्वं जातिः, भावत्वम् अखण्डोपाधिश्च पटपदार्थ-भावपदार्थान्तर्भावेणैव प्रतीयते, नतु शब्देन ते उल्लिखिते इति न तयोः प्रतीतावत्र सविशेषणं भानं, किन्तु पटत्वांशे भावत्वांशे च विशेषणभानरहितमेव निरवच्छिन्नं भानं जायते। यत्र तु तयोरुल्लेखः, तत्र तयोः प्रतीतिरपि सावच्छिन्ना (विशेषणप्रतीतिसहिता) भवति। यथा 'अस्मिन् द्रव्ये भावत्वं पटत्वञ्चास्ति' इत्यत्र पटत्वं भावत्वञ्च स्पष्टत एव शब्देन उल्लिखितमिति तयोरत्र यथाक्रमं पटत्वेन भावत्वेन च सावच्छिन्ना प्रतीतिः। अतएव "अनुल्लिख्यमान-जात्यखण्डोपाध्यतिरिक्तपदार्थानां निरवच्छिन्नभानानभ्युपगमः" इति ग्रन्थकृद्भिः सिद्धान्तितः।

सम्बन्धः सन्निकर्षः स च विभिन्नयोः वस्तुनोर्विशेषणविशेष्यभावप्रयोजकः। यथा 'दण्डी पुरुषः' इति दण्डपुरुषयोः विशेषणविशेष्यभावप्रयोजकः संयोगः सम्बन्धः। दण्डपुरुषयोरन्तरा संयोगं विना 'दण्डी पुरुषः' इति विशेषण-विशेष्यभावप्रतीतिरेव न स्यात्। सम्बन्धश्च द्विविधः,—साक्षात्-परम्पराभेदात्। सम्बन्धान्तराघटितः सम्बन्धः साक्षात्सम्बन्धः ; स च समवाय-संयोग-स्वरूपादिभेदात् बहुविधः। 'रूपवान् पुरुषः' 'पात्रे जलमस्ति' 'गृहे पटो नास्ति' इत्यादौ पुरुषे रूपस्य पात्रे जलस्य, गृहे च पटाभावस्य यथाक्रमं समवाय-संयोग-स्वरूपनामानः सम्बन्धाः प्रतीयन्ते। समवायश्च षष्ठपदार्थतया कणादेनोक्तः नित्यः सम्बन्धः ; यथा 'रूपवान् ब्राह्मणोऽयं चलति' इत्यादौ ब्राह्मणत्वजातेः, रूपगुणस्य, चलनक्रियायाश्च ब्राह्मणे समवायः सम्बन्धः। यावदाधारं यावदाधेयं वा समवायस्तिष्ठतीति समवायो नित्यसम्बन्धः इत्युच्यते ; समवायस्यैव 'अयुतसम्बन्धः' इति नामान्तरम्। संयोगादिकस्तु नैवम् ; सतोरपि आधाराधेययोः (दण्डपुरुषयोः) संयोगादेरपायदर्शनात्। संयोगश्च कणादोक्तगुणविशेषः। अभावादेः सम्बन्धः स्वरूपसम्बन्धः ; यथा 'भूतले पटो नास्ति' इत्यादौ भूतले पटाभावस्य स्वरूपसम्बन्धः प्रतीयते। स्वरूपसम्बन्धस्यैव 'विशेषणता' इति नामान्तरम्।

सम्बन्धान्तरघटितः (यस्य सम्बन्धस्य निर्माणे सम्बन्धान्तरापेक्षा विद्यते तादृशः)

सम्बन्धः परम्परासम्बन्धः। यथा स्वसमवायिसमवेतत्वरूपेण* सामानाधिकरण्य-नामकेन परम्परासम्बन्धेन पटे तन्तोरपि रूपमस्ति।

अयञ्च सम्बन्धः समवायघटितः। एवं दण्डकमण्डलुधारिणि पुरुषे गृहे तिष्ठति सति स्वसंयोगि-संयोगित्वरूपेण † स्वाश्रयाश्रयत्वेन परम्परासम्बन्धेन दण्डकमण्डलू अपि गृहे स्त इति। अयञ्च सम्बन्धः संयोगघटितः।

समवायादिसाक्षात्सम्बन्धवत् परम्परासम्बन्धो न नियतसंख्यकः, नापिच नियतपरिमाणः, यथेच्छं सम्बन्धिसम्बन्धादिक्रमादाय दीर्घ-दीर्घतर-दीर्घतमा असंख्या एव ते कल्पयितुं शक्यन्ते। सर्व्वतोऽसंसृष्टावपि पदार्थौ परम्परासम्बन्धेन सम्बद्धौ भवतः; तत्र च दूरत्वादि न प्रतिबन्धकं, तथाहि स्वसम्राड़धिकृतराज्यत्वसम्बन्धेन भारतवर्षीयाः सर्व्वएव आर्य्या अनार्य्याश्च इंलण्डे सन्ति; इंलण्डीयाश्च तत्र स्थिता अपि स्वराज्ञेश्वरीसाम्राज्यसम्बन्धेन भारतवर्षे तिष्ठन्तीति। परम्परासम्बन्धस्य गूढ़ं रहस्यमिदं,—स्वशब्देन यमभिप्रेत्य यस्य परम्परासम्बन्धस्यारम्भः, यस्मिंश्च पर्य्यवसानं, तत् तेन परम्परासम्बन्धेन तस्मिन् तिष्ठति। यथा पूर्व्वोक्ते उदाहरणे स्वशब्देन भारतवर्षीयान् अभिप्रेत्य स्वसम्राड़धिकृतराज्यत्वसम्बन्धस्य आरम्भः, तच्च राज्यत्वम् इंलण्डे वर्त्तत इति तस्य इंलण्डे पर्य्यवसानम्, अतः तेन सम्बन्धेन भारतवर्षीयाः इंलण्डे तिष्ठन्ति।

पुनश्च सम्बन्धो द्विविधः,—वृत्तिनियामकः वृत्त्यनियामकश्चेति। यस्मिंश्च सम्बन्धे सति एकस्मिन् अपरस्य वृत्तिता, आधाराधेयभावः, आश्रयाश्रयिभावो वा प्रतीयते-स सम्बन्धः वृत्तिनियामकः। वृत्तिनियामकसम्बन्धस्थले आधारे सप्तमीविभक्तिः प्रयुज्यते, यथा 'भूतले घटः'; आधेये च मतुबादयः प्रत्ययाः भवन्ति, यथा 'भूतलं घटवत्'। वृत्तिनियामकसम्बन्धश्च समवायसंयोग-स्वरूपप्रभृतय एव केचन; तेषु सम्बन्धेषु सत्सु 'पृथिव्यां रूपं', 'कुण्डे वदरं', 'भूतले घटो नास्ति' इत्यादिप्रयोगात्। समसूत्रपातेन स्थितयोरुभयोः संयोगोऽपि न वृत्ति-नियामकः। अतएव अञ्जलिरूपतया समसूत्रपातेन स्थितयोर्हस्तयोः संयोगो

---

* स्वस्य तन्तुरूपस्य समवायी तन्तुः; तत्र समवेतः पट इति।

† स्वयोः दण्डकमण्डल्वोः संयोगी (आश्रयः) पुरुषः; तस्य संयोगि (आश्रयः) गृहमिति।

न वृत्तिनियामक इति तत्र न 'हस्ते हस्त:' इति प्रयोग:। तयोरेव हस्तयो: उपर्य्यधोभावेन स्थितयो: पुन: संयोगो वृत्तिनियामक इति तत्र 'हस्ते हस्त:' इति प्रयोगोऽपि भवति।

यस्मिंस्तु सम्बन्धे पूर्व्वोक्तरूपा वृत्तिता आधाराधेयभावश्च न प्रतीयते, केवलं सम्बन्धितामात्रं, स वृत्त्यनियामक: सम्बन्ध:। तत्र सप्तमीविभक्ते: मतुबादिप्रत्ययस्य च प्रयोगो न भवति, किन्तु सम्बन्धित्वबोधका: 'इन्'-'ईय'-प्रभृतय: प्रत्यया: प्रयुज्यन्ते। यथा स्वत्वसम्बन्धो न वृत्तिनियामक: इति मन्त्रिणि सत्यपि स्वत्वसम्बन्धे 'मन्त्री राजवान्' इति किंवा 'मन्त्रिणि राजा' इति न प्रयोग: ; किन्तु 'राजकीयो मन्त्री' इति प्रयोग:। परम्परासम्बन्धा: प्रायश: सर्व्वएव वृत्त्यनियामका:। अतएव शिखिनि पुरुषे गृहे तिष्ठति स्वाश्रयपुरुषाश्रयत्वसम्बन्धेन 'शिखावद् गृहम्' इति न प्रयोग:।

कालिकनामक: सम्बन्ध: कश्चित् वृत्तिनियामक: कश्चिच्च वृत्त्यनियामकोऽस्ति *। वृत्तिनियामकेन कालिकसम्बन्धेन काले सर्व्वं वर्त्तते। स च काल: महाकालरूप: खण्डकालरूपश्च। 'काले सर्व्वम्' इति महाकालविषयिणी प्रतीति: ; 'अस्मिन् मासे शीताधिक्यम्' ; 'अद्य वृष्टिर्जाता' इत्यादयश्च खण्डकालविषयिण्य: प्रतीतय:। वृत्त्यनियामक: कालिकस्तु स्वाश्रयकालाश्रितत्वरूप: परम्परासम्बन्ध: ; तेन सम्बन्धेन सर्व्वं सर्व्वत्र वर्त्तते। तथाहि गृहस्य आश्रय:

---

* महाकालखण्डकालयोर्वृत्तिताप्रयोजक: 'कालिकविशेषणता'-नामक: कश्चित् साक्षात्सम्बन्धोऽस्ति। केचित् कालिकविशेषणतासम्बन्धेन वस्तु महाकाले एव वर्त्तते न तु खण्डकालेऽपि। "क्रियैव काल:" इति गमनस्पन्दनादिरूप: क्रियाविशेष एव खण्डकाल: ; तस्मिन् स्वाश्रयकालाश्रितत्वरूप-परम्परासम्बन्धेन तत्समकालीनं सर्व्वमेव वर्त्तते। खण्डकाले च अयं परम्परासम्बन्ध: वृत्तिनियामक:। तत्रायं विशेष:—यदा खण्डकालस्य गमनादिक्रियारूपस्य कालवाचकेन वत्सरमासदिनक्षणादिशब्देन 'इदानीं'-'तदानीं'-प्रभृतिशब्देन वा (तत्तत्कालत्वेन प्रत्ययार्थे) प्रयोग:, तदैव अयं परम्परासम्बन्ध: वृत्तितानियामक:, क्रियावाचकेन गमनस्पन्दनादिशब्देन प्रयोगे न वृत्तिता नियामक:। अतएव 'इदानीं घट:', 'अस्मिन् दिने घट:' इत्यादि प्रयोगवत् 'गमने घट:' इति न प्रयोग:।

य: काल: तस्मिन् काले पुरुषोऽपि वर्त्तते इति स्वाश्रयकालाश्रितत्वसम्बन्धेन (स्वस्य गृहस्य आश्रय: काल: तदाश्रित: पुरुष:) गृहमपि पुरुषे वर्त्तते ।

"अयं न द्वौ किन्तु द्वित्ववान्" इति प्रतीते: 'द्वौ' 'द्वित्ववान्' इति पदयो: अर्थविशेषावधारणाय नवीनै: कश्चित् पर्य्याप्तिनामक: सम्बन्ध: स्वीक्रियते। पर्य्याप्ति: पर्य्यवसानम्, साकल्येन सम्बन्ध:, अर्थात् यस्य यावन्त: आश्रया: सन्ति, तस्य तावत्स्वेवाश्रयेषु मिलितेष्वेव सम्बन्ध:। पर्य्याप्तिसम्बन्धेन द्वित्वसंख्या मिलितयोरेव द्वयोर्वर्त्तते नत्वेकैकस्मिन्; एवं त्रित्वसंख्या मिलितेष्वेव त्रिषु वर्त्तते नत्वेकैकस्मिन् द्वयोर्वा। अतएव द्वित्वादय: संख्या 'व्यासज्यवृत्तय:', (व्यासज्य सर्व्वमेवाधारमधिकृत्य वर्त्तन्ते) इत्युच्यन्ते। एवञ्च द्विशब्दस्य पर्य्याप्तिसम्बन्धेन द्वित्वाधारताप्रतीते: एकस्य च पर्य्याप्तिसम्बन्धेन द्वित्वाधारत्वाभावात् "अयं न द्वौ" इति प्रतीतिर्भवति। समवायसम्बन्धेन पुन: द्वित्वसंख्या द्वयो: एकैकस्मिन्नपि तिष्ठतीति 'समवायसम्बन्धेन द्वित्वाश्रय' इत्यर्थमभिप्रेत्य 'द्वित्ववान्' इति प्रयोग:। ततश्च 'अयं न द्वौ किन्तु द्वित्ववान्' इति वाक्यस्य 'अयं न पर्य्याप्तिसम्बन्धेन द्वित्ववान् किन्तु समवायसम्बन्धेन द्वित्ववान्' इत्यर्थ:। संख्यादीनामिव वक्ष्यमाणाया अवच्छेदकताया अपि पर्य्याप्तिसम्बन्धोऽङ्गीक्रियते।

विषयता विषयिता चेति अपरौ द्वौ वृत्त्यनियामकौ सम्बन्धौ स्त:, तत्र विषया: घटपटादयो ज्ञानेच्छादौ विषयतासम्बन्धेन वर्त्तन्ते। विषयितासम्बन्धेन च ज्ञानेच्छादयो घटपटादौ विषये तिष्ठन्तीति।

सम्बन्धो यद्यपि उभयनिष्ठ: यथा कुण्डवदरयो: सम्बन्ध: कुण्डे वदरे च अस्ति, तथापि केनचित् सम्बन्धेन कश्चिदेव कुत्रचिदेव तिष्ठति; यथा संयोगेन सम्बन्धेन कुण्डे एव वदरं तिष्ठति न तु वदरे कुण्डम्; एवं भूतले एव घटो वर्त्तते न तु घटे भूतलमिति। अत्र कारणमेतत् —सम्बन्धस्यैकं प्रतियोगि, अपरञ्चानुयोगि भवति। यस्य सम्बन्धस्य यत् प्रतियोगि भवति, तेन सम्बन्धेन तदेव तिष्ठति। यच्च यस्य सम्बन्धस्य अनुयोगि भवति, तेन सम्बन्धेन तत्र प्रतियोगि तिष्ठति। यथा कुण्डवदरयो: संयोगे वदरं प्रतियोगि कुण्डञ्चानुयोगीति कुण्डे वदरं वर्त्तते। धर्म्मधर्म्मिणो: सम्बन्धस्य धर्म्म: प्रतियोगी धर्म्मि चानुयोगि भवति। अतएव धर्म्म एव धर्म्मिणि वर्त्तते न तु धर्म्मि धर्म्मे।

यच्च यत्र वर्त्तते तत् तस्य आधेयम्, आश्रितं तद्वृत्ति इति चोच्यते, यत्र यद्वर्त्तते तत् तस्य अधिकरणम्, आधार:, आश्रय इति चोच्यते। यथा कुण्डे वदरं

वर्त्तते, गृहे पटो वर्त्तते इति वदरं पटश्च आधेयः, कुण्डं गृहञ्च आधार इति। यत्र यस्य आधेयं तस्मिन् तन्निरूपिता वृत्तिता तिष्ठति, एवं यत्र यस्य अधिकरणम्, तस्मिन् तन्निरूपिता अधिकरणता वर्त्तते ;* यथा पूर्व्वोक्तयोः उदाहरणयोः कुण्डनिरूपिता वृत्तिता वदरे, गृहनिरूपिता च आधेयता पटे वर्त्तते। एकस्य वृत्तितायाम् अपरस्य अधिकरणता अवश्यंभाविनी, एवञ्च एकस्य अधिकरणतायाम् अपरस्य वृत्तिता नियता। अतएव वृत्तिताधिकरणतयोः परस्परनियतसापेक्षतया वृत्तिताधिकरणतयोश्च परस्परं निरूप्यनिरूपकभावोऽस्ति,—वृत्तितानिरूपिता अधिकरणता, अधिकरणतानिरूपिता च वृत्तितेति। ततश्च 'कुण्डे वदरम्' इति वाक्यस्य 'कुण्डनिरूपितवृत्तितावद् वदरम्' किंवा 'कुण्डनिष्ठाधिकरणता-निरूपिताधेयतावत् वदरम्' इत्यर्थः प्रतीयते। एवं 'वदरवत् कुण्डम्' इत्यस्य प्रयोगस्य 'कुण्डं वदरनिरूपिताधिकरणतावद्' इति, किंवा 'कुण्डं वदरनिष्ठवृत्तिता-निरूपिताधिकरणतावद्' इत्यर्थः पर्य्यवसीयते।

सम्बन्धवद्-अभावस्यापि एकं प्रतियोगि, अपरञ्च अनुयोगि अस्ति। यः अभावः यस्य विरोधी प्रतिपक्षः, यस्य अभावो यस्य, 'घटस्य अभावः, पटस्य अभावः'-इत्यादिरीत्या यत्सम्बन्धितया अभावः प्रतीयते, तत् तस्य अभावस्य प्रतियोगि भवति, यथा यत्र घटाभावोऽस्ति तत्र घटो नैव तिष्ठति इति घटाभावो घटस्य विरोधी, एवम् अयमभावो घटस्येति घटाभावस्य घटः प्रतियोगी, रूपाभावस्य रूपं प्रतियोगि। यत्राभावो वर्त्तते, तद् अभावस्यानुयोगि भवति, यथा वायुः रूपाभावस्यानुयोगी, घटादिर्जड़पदार्थः ज्ञानाभावस्य। प्रतियोगिनि प्रतियोगिता, अनुयोगिनि च अनुयोगिता वर्त्तते।

---

* अधिकरणतावृत्तिताप्रभृतयो धर्म्माः सापेक्षाः ;—किमपि अधिकरणं विना कुत्र वृत्तिता भवेत्, आधेयञ्च विना कस्य अधिकरणता भवेत् ? ततश्च वृत्तिता अधिकरणमपेक्षते, अधिकरणता च आधेयमिति। यच्च यदपेक्षते, तत् तन्निरूपितं भवति, घटस्य वृत्तिता कुत्र ? भूतले अन्यत्र वा ? इति सन्देहः 'भूतले घटस्य वृत्तिता' इत्युत्तरेण निवार्य्यते—'भूतले' इत्यनेन हि वृत्तिता कीदृशीति निरूप्यते (विशेषतोऽवधार्य्यते)। अतः भूतलमधिकरणं घटस्य वृत्तितानिरूपकमिति। एतादृश्यैव युक्त्या अधिकरणता आधेयनिरूपिता प्रत्येतव्या। अनयैव च युक्तिभङ्ग्या कार्य्यताकारणतयोः उद्देश्यताविधेयतयोः परस्परसापेक्षयोः धर्म्मयोः अन्येषाञ्च ईदृशानां निरूप्यनिरूपकभावोऽवसेयः।

एकत्र एकेन सम्बन्धेन वर्त्तमानस्यापि सम्बन्धान्तरेण अभावो वर्त्तते। यथा भूतले संयोगेन सम्बन्धेन वर्त्तमानस्यापि घटस्य समवायसम्बन्धेनाभावः। एवम् एकत्र एकेन रूपेण वर्त्तमानस्यापि रूपान्तरेण अभावो भवति, यथा शुक्लपटवति गृहे पटत्वरूपेण सामान्यधर्मेण वर्त्तमानस्यापि पटस्य नीलघटत्वरूपेण विशेषधर्मेण, बहिर्वृत्तित्वविशिष्टपटत्वरूपेण वा विशिष्टधर्मेण, पटघटोभयत्वरूपेण वा उभयत्व-पुरस्कारेण अभावो भवति। नहि शुक्लपटस्य विद्यमानत्वेनैव नीलपटस्यापि वृत्तिता भवति, नापि च बहिर्वृत्तिः (बहिरवस्थानदशायां) घटो भूतले वर्त्तते; एवं गृहे केवलस्य पटस्य सत्त्वेऽपि घटस्याभावेन पटघटोभयस्यापि अभावोऽस्त्येव, एकाभावेन उभयाभावस्य अवश्यम्भावित्वात्। इत्येवम् अभावस्य सम्बन्धविशेषकृतं धर्मविशेषकृतञ्च वैलक्षण्यं भवति।

तच्च अभावस्य वैलक्षण्यं प्रतियोगितावैलक्षण्यनिबन्धनमिति तदेवोच्यते। अभावस्य प्रतियोगिता केनचित् सम्बन्धेन केनचित् धर्मेण अवच्छिन्ना भवति, येन सम्बन्धेन येन वा धर्मेण अवच्छिन्ना भवति, स सम्बन्धः स च धर्मः तस्याः प्रतियोगितायाः अवच्छेदको भवति। यथा 'भूतले समवाय-सम्बन्धेन घटो नास्ति' इत्यादौ घटाभावस्य प्रतियोगिता समवायेन सम्बन्धेन घटत्वेन च धर्मेण अवच्छिन्ना। ततश्च तस्याः प्रतियोगितायाः समवायः सम्बन्धः घटत्वञ्च धर्मः अवच्छेदकः, अतएव 'समवायेन घटो नास्ति' इत्यस्य समवायसम्बन्धावच्छिन्न-घटत्वावच्छिन्नप्रतियोगिताकोऽभावो वर्त्तते इत्यर्थः।

सम्बन्धस्य प्रतियोगितावच्छेदकत्वस्वीकारे युक्तिरियं—सामान्यतः कस्यापि कुत्रापि प्रायशः अभावो नास्ति; अन्ततः कालिकसम्बन्धेन सर्व्वस्य सर्व्वत्र विद्यमानत्वात्। ततश्च अभावस्यान्तरा कश्चित् सम्बन्धोऽस्तीत्यवश्यमङ्गीकार्य्यम्। अभावस्यान्तरा प्रविशन् सम्बन्धः प्रतियोगितामेव अवच्छिन्दन् (विशेषयन्) सम्भवति, नान्यथा, येन सम्बन्धेन यत्र यन्नास्ति, सएव सम्बन्धस्तत्र तदभावस्य प्रतियोगिताम् अवच्छिनत्ति (विशेषयति)। अतएव सएव सम्बन्धः तस्याः अवच्छेदको भवति, प्रतियोगिता च तेन सम्बन्धेन अवच्छिन्ना भवति। यथा 'भूतले समवायसम्बन्धेन घटो नास्ति' इत्यत्र समवायसम्बन्धः भूतले घटाभावस्य प्रतियोगितां विशेषयतीति घटाभावस्य प्रतियोगिता समवायसम्बन्धावच्छिन्ना। समवायसम्बन्धश्च तस्याः प्रतियोगिताया अवच्छेदकः। तथाच सम्बन्धस्य अवच्छेदकत्वं विशेषकत्वरूपमिति फलितम्।

धर्म्मस्य प्रतियोगितावच्छेदकत्वे युक्तिरियम्,—अभावस्य प्रतियोगिता कुत्र वर्त्तते, कुत्र वा न वर्त्तते इति निर्णयाय प्रतियोगितानियामक: कश्चिदस्तीति अवश्यमङ्गीकार्य्यम्। सर्व्वेषु प्रतियोगिषु वर्त्तमान: तदन्यत्र अवर्त्तमान: प्रतियोगिगत: कश्चिद्-असाधारणो धर्म्म एव प्रतियोगिताया: नियामको भवति। य एव नियामक: स एव अवच्छेदक इत्युच्यते; यश्च नियमित: स अवच्छिन्न इति। तथाहि घटाभावस्य घटगता प्रतियोगिता कुत्र कुत्र वर्त्तते, कुत्र कुत्र वा न वर्त्तते? इति प्रश्नस्योत्तर-मिदमेव भवति—यत्र यत्र घटत्वं वर्त्तते, तत्र सर्व्वत्रैव घटाभावस्य घटगता प्रतियोगिता वर्त्तते, नान्यत्र कुत्रचित् घटत्वशून्ये, नापि च कस्मिन्नपि घटे तस्या अभाव इति घटत्वमेव घटगताया: घटाभावप्रतियोगिताया: स्थितिनियामकम्, घटत्वेनैव घटाभावप्रतियोगिता नियमितेति नियामकत्वमेवावच्छेदकत्वम्, नियमितत्वमेवावच्छिन्नत्वमिति। यश्च प्रतियोगी भवति तत्र विशेषणतया प्रतीय-मानोऽसाधारणो धर्म्म: तद्गतप्रतियोगिताया अवच्छेदको भवतीति फलितार्थ:। अथवा स्थूलत: एवंरीत्या बोध्यम्—प्रतियोगिबोधक-विशेष्यपदोत्तरम् 'त्व'-'ता'-प्रभृति-भावप्रत्ययनिष्पन्नो (निष्पन्नपदवाच्य:) धर्म्म: प्रतियोगितावच्छेदको भवति; यथा घटाभावस्य घट: प्रतियोगीति प्रतियोगिवाचकं घटपदम्, तदुत्तरं 'त्व'-प्रत्ययेन (घट+त्व) निष्पन्नो धर्म्म: (घटत्वं जाति:) घटगत प्रतियोगिताया: अवच्छेदक: इति। एवं रूपाभावस्य प्रतियोगिवाचकम् रूपपदम्, तत्र 'त्व'—प्रत्ययनिष्पन्न-पदस्यार्थ: रूपत्वं जाति:, रूपाभावस्य प्रतियोगिताया अवच्छेदिकेति।

यद्यपि अवच्छेदकत्व नियामकत्वयोरैक्यम्, तथापि ग्रन्थकृद्भि: अवच्छेदकपदस्यैव प्रयोगात् अवच्छेदकशब्द एव प्रयोक्तव्य:, नतु नियामकशब्दोऽपि; तथात्वे अप्रयुक्तता दोष: स्यात्। वृत्तितावत् प्रतियोगितापि अभावेन निरूपिता भवति, अभावश्च प्रतियोगिताया: नियामक:; एवम् अवच्छेदकता-प्रतियोगितयोरपि परस्परं निरूप्यनिरूपकभावोऽस्ति—अवच्छेदकता-निरूपिता प्रतियोगिता भवति, प्रतियोगिता-निरूपिताच अवच्छेदकता भवति। ततश्च, 'समवायेन घटो नास्ति,' इत्यस्य समवायसम्बन्धावच्छिन्न-घटत्वावच्छिन्न-प्रतियोगिता-निरूपकोऽयमभाव:।

एकस्य अभावस्यबहूनि प्रतियोगीनि सन्ति। सुतरां प्रतियोगिता: तदवच्छेदक-धर्म्मा:, तदवच्छेदकसम्बन्धाश्चापि बह्वो भवन्ति। तथाहि द्वितीयाभाव: (घटाभा-वाभाव:) प्रतियोगि-(घट)-स्वरूप:, तृतीयाभाव: (घटाभावाभावाभाव:) प्रथमाभाव (घटाभाव)-स्वरूप इति प्रथमाभावस्य (घटाभावस्य) घट इव द्वितीयाभावोऽपि

(घटाभावाभावोऽपि) प्रतियोगी। तस्मिंश्च एका अपरा प्रतियोगिता वर्त्तते। तस्याश्च प्रतियोगितायाः अवच्छेदको धर्मः द्वितीया भावत्वं (घटाभावाभावत्वम्)। अवच्छेदकसम्बन्धश्च स्वरूपम्। एवमन्यदपि प्रतियोगि ऊह्यम्।

भावपदार्थवत् अभावोऽपि व्याप्यवृत्तिरव्याप्यवृत्तिश्च भवति। 'व्याप्य' सर्व्वमेव आधारस्यांशं कालं देशं वा अवलम्ब्य वर्त्तते यः, स व्याप्यवृत्तिः ; कस्मिन्नपि अंशे, कालविशेषे देशविशेषे वा यस्याधिकरणे अभावो नास्ति, स व्याप्य-वृत्तिः। यथा मनुष्ये मनुष्यत्वं जातिः, आकाशे रूपाभाव',शशे विषाणाभावः। स्वाधारेऽपि यस्याभावो वर्त्तते स अव्याप्यवृत्तिः, यथा वृक्षे कपिसंयोगः, कपिसंयोगाभावश्च अव्याप्यवृत्तिः।

अव्याप्यवृत्तिपदार्थस्य कश्चित् वृत्तितायाः सीमापरिच्छेदकोऽस्ति। परिच्छेदक एव अत्र अवच्छेदकनाम्ना व्यवह्रियते। स च क्वचित् आधारस्य अंशविशेषः, क्वचित् कालविशेषः, क्वचिच्च देशविशेष इति। यथा 'शाखायां वृक्षः कपिसंयोगी न मूले' इत्यत्र वृक्षे कपिसंयोगस्य वृत्तिताया शाखा सीमा-परिच्छेदकतया अवच्छेदिका, कपिसंयोगाभावस्य तु मूलमवच्छेदकम्। 'उत्पत्ति-काले पुष्पं न गन्धवत् किन्तु तदुत्तरम्' इत्यत्र पुष्पे गन्धाभावस्य वृत्तितायाम् उत्पत्तिकालः अवच्छेदकः, गन्धस्य वृत्तितायान्तु उत्पत्तेरनन्तरकालः अवच्छेदकः। 'वसन्ते यवा मगधे तिष्ठन्ति न तु गिरौ' इत्यत्र वसन्ते यववृत्तितायाः मगधदेशः अवच्छेदकः, यवाभावस्य वृत्तितायां गिरिप्रदेशः अवच्छेदकः। अव्याप्यवृत्तितायाः अवच्छेदकवाचकपदे प्रायशः सप्तमी भवति। यथा 'अग्रे वृक्षः कपिसंयोगी न मूले' इति प्रयोगः।

अव्याप्यवृत्तिरभावः प्रतियोगिसमानाधिकरणो भवति,* यथा वृक्षे कपिसंयोगा-भावः ; वृक्षे कपिः कपिसंयोगाभावश्चास्ति। व्याप्यवृत्तिस्तु प्रतियोगिव्यधिकरणः† यथा आकाशे रूपाभावः ; आकाशे रूपाभाव एवास्ति न तु रूपमिति।

---

* प्रतियोगिनः 'समानम्' एकम् अधिकरणं, यस्य स प्रतियोगिसमानाधिकरणः, प्रतियोगिना सह एकत्र स्थित इति यावत्।

† प्रतियोगिनः 'वि' विरुद्धम् अधिकरणं यस्य सः, प्रतियोगिनोऽधिकरणे यो न तिष्ठति।

अभावश्च पुनर्द्विविधः अन्योन्याभावः संसर्गाभावश्च। तादात्म्यं (तत्स्वरूपता ऐक्यम् अभेदः) नाम कश्चित् सम्बन्धोऽस्ति तेन सम्बन्धेन, तस्य सम्बन्धस्य प्रतियोग्यनुयोगिनोरभेदः प्रतीयते, यथा 'सुन्दरो नरः' इत्यत्र नरसुन्दरयोः ऐक्यं प्रतीयते। तादात्म्यसम्बन्धेनाभावः (भेदः) अन्योन्याभावः—यस्य अभावस्य प्रतियोगिता तादात्म्यसम्बन्धेन अवच्छिन्ना स अन्योन्याभावः इति। यथा 'घटो न पटः' इति। ततश्च न्यायभाषायामन्योन्याभावस्य, 'तादात्म्यसम्बन्धावच्छिन्नप्रतियोगितानिरूपकाभावत्वं अन्योन्याभावत्वम्' इति लक्षणं पर्य्यवसितं भवति, अन्योन्याभाव एव भेदः।

अन्योन्याभावभिन्नोऽभावः संसर्गाभावः। नञा अभावबोधने यत्र प्रतियोगिपदे अनुयोगिपदे च प्रथमा भवति, तत्र अन्योन्याभावः प्रतीयते; यथा 'घटो न पटः' इति; यत्र पुनः प्रतियोगिपदे प्रथमा अनुयोगिपदे च सप्तमी भवति, तत्र नञा संसर्गाभावः प्रतीयते; यथा 'भूतले घटो नास्ति'।

स्थूलत इदमत्रावधेयम्,—अन्योन्यस्मिन् अन्योन्यस्य अभावः (तादात्म्याभावः भेद इति यावत्) अन्योन्याभावः संसर्गस्य प्रतियोगिनः सम्बन्धस्य अनुयोगिनि अभावः संसर्गाभावः। अन्योन्याभावस्थले प्रतियोग्यनुयोगिनोः घटपटयोः परस्परम् अभेदाभावः (भेदः) प्रतीयते; संसर्गाभावस्थलेतु प्रतियोग्यनुयोगिनोः घटभूतलयोः सम्बन्धो नास्तीति पर्य्यवसाने प्रतीतिः। अतएव प्रतियोग्यनुयोगिनोरभेदेऽपि 'घटे घटो नास्ति' इति संसर्गाभावप्रतीतिः।

प्रतियोगितावत् अवच्छेदकता-साध्यता-कार्य्यता-विधेयता-हेतुता-कारणता-प्रकारतादयोपि धर्म्मगता-सापेक्षधर्म्माः केनचिद्धर्म्मेण केनचिच्च सम्बन्धेन अवच्छिन्ना भवन्ति। अत्र वृत्तिता-प्रतियोगितास्थलीययुक्तिरिव युक्तिः स्वयमुन्नावनीया। तत्र कियन्ति उदाहरणानि दर्शयामि,—अवच्छेदके विशेषणीभूतो धर्म्मः अवच्छेदकतायाः अवच्छेदको भवति। अवच्छेदके विशेषणीभूतो धर्म्मः येन सम्बन्धेन तिष्ठति स सम्बन्धः अवच्छेदकतावच्छेदकः सम्बन्धो भवति। यथा 'दण्डी नास्ति' इत्यत्र दण्डिनि प्रतियोगिनि विशेषणतया उपस्थितो दण्डो दण्डिगतप्रतियोगिताया अवच्छेदकः; दण्डश्च दण्डिनि संयोगसम्बन्धेन तिष्ठतीति दण्डगता प्रतियोगितावच्छेदकता संयोगसम्बन्धावच्छिन्ना। दण्डे च दण्डत्वं विशेषणतया उपस्थितमिति दण्डगतायाः प्रतियोगितावच्छेदकतायाः अवच्छेदकम् दण्डत्वम्। दण्डत्वञ्च दण्डे समवायसम्बन्धेन तिष्ठतीति दण्डत्वगता अवच्छेदकता

समवायसम्बन्धावच्छिन्ना। दण्डत्वे च किमपि विशेषणतया न प्रतीयते इति दण्डत्वगता अवच्छेदकतावच्छेदकता निरवच्छिन्ना। ततश्च 'दण्डी नास्ति' इत्यस्य नैयायिकभाषायाम् अयमर्थः ; समवायसम्बन्धावच्छिन्न-दण्डत्वनिष्ठावच्छेदकतानिरूपित-संयोगसम्बन्धावच्छिन्नदण्डनिष्ठावच्छेदकतानिरूपित-संयोगसम्बन्धावच्छिन्नदण्डिनिष्ठ-प्रति-योगितानिरूपकोऽभावः।

येन सम्बन्धेन यत् साध्यते, यत् क्रियते, यत् विधीयते, यो हेतुः, यत् कारणम्, यश्च प्रकारो भवति, स सम्बन्धः तन्निष्ठसाध्यता-कार्य्यता-विधेयता-हेतुता-कारणता-प्रकारतानामवच्छेदको भवति। 'सुन्दरो नरः' इत्यादौ नरस्य धर्म्मिणः केवलं विशेष्यतयैव प्रतीतिः तस्य सम्बन्धो न कुत्रापि बोध्यते इति धर्म्मिगता अधिकरणता-अनुयोगिता-विशेष्यता-पक्षतादयः सापेक्षधर्म्माः न केनापि सम्बन्धेनावच्छिन्नाः, केवलं धर्म्मेणैव तेऽवच्छिन्ना इति।

यो धर्म्मः साध्यादौ विशेषणतया प्रतीयते स धर्म्मः साध्यतादीनामवच्छेदको भवति। यथा 'पर्व्वतो वह्निमान् धूमात्' इत्यत्रानुमाने पर्व्वते पक्षे धूमेन हेतुना वह्निः संयोगसम्बन्धेन साध्यते * इति यथाक्रमं पर्व्वतत्वं पक्षतावच्छेदकं, धूमत्वं हेतुतावच्छेदकं, वह्नित्वं साध्यतावच्छेदकम्। संयोगश्च साध्यतावच्छेदकः सम्बन्धः। हेतुरपि संयोगसम्बन्धेनैव कृत इति हेतुतावच्छेदकसम्बन्धोऽपि संयोग एव। यत्र च साध्यतावच्छेदको धर्म्मः सखण्डः, तत्र साध्यतावच्छेदकतावच्छेदकोऽप्यस्ति। यथा 'शतायुरप्ययं वृद्धो मरिष्यति, मनुष्यत्वात्'-इत्यनुमाने मरणं साध्यं, मरणत्वञ्च साध्यतावच्छेदकम् ; मरणञ्च श्वासप्रश्वासयोर्विरामः इति श्वासप्रश्वासविरामरूपं मरणत्वं सखण्डोपाधिः धर्म्मः ; ततश्च मरणत्वत्वेन धर्म्मेण मरणत्वमत्र विशेषणीभूतमिति मरणत्वत्वं साध्यतावच्छेदकतावच्छेदकम्। एवमन्यदपि ज्ञेयम्।

अवच्छेदकपदस्य क्वचित् विशेषणमित्यर्थः ; अवच्छिन्नपदस्य च विशिष्टम् आश्रय इत्यर्थोऽपि भवति। यथा—"अवच्छेदकत्वमात्रेणान्वयः" इत्यत्र 'अवच्छेदकत्व-

---

* यस्मिन् अनुमीयते स पक्षः, यत् अनुमीयते तत् साध्यं, येनच साधनेन (ज्ञापकेन) अनुमीयते स हेतुरित्युच्यते। साध्यस्य 'लिङ्गि' इति नामान्तरं। हेतोश्च 'साधनम्' इति 'लिङ्गम्' इति च नामान्तरम्।

पदस्य विशेषणत्वमर्थः। "वह्नित्वावच्छिन्नस्य यस्य कस्यचिद्" इत्यत्र 'वह्नित्वावच्छिन्नस्य' 'वह्नित्वाश्रयस्य' इत्यर्थो बोध्यते।

ज्ञानं द्विविधं निर्विकल्पकं सविकल्पकञ्च। 'निर्' नास्ति 'विकल्पः' विशेष्यविशेषणभावः विशेष्यविशेषणयोः सम्बन्धो वा यस्मिन् तत् निर्विकल्पकम्। निर्विकल्पके हि ज्ञाने केवलं धर्मधर्मिणोः पटत्वपटयोः परस्परम् असंसृष्टयोः (पट-पटत्वे इत्याकारकं) भानं (प्रकाशो) भवति, न तु तयोः सम्बन्धस्यापि भानम्। विषयेन्द्रिय-सन्निकर्षे सति जायमानं प्राथमिकं प्रत्यक्षं निर्विकल्पकं भवति। तत्रेदं, कारणं,—विशिष्टबुद्धिं * प्रति विशेषणज्ञानस्य हेतुत्वं, नहि अज्ञातशुक्लरूपस्य जनस्य 'इदं शुक्लं वस्त्रम्' इति प्रतीतिर्भवति। ततश्च पटे चक्षुःसंयोगात्पूर्व्वं तत्समकालं वा पटत्वज्ञानस्य नियतमसम्भवात् पटत्वज्ञानं विना पटत्वस्य विशेषणतया पटे ज्ञानासम्भव इति, पटे चक्षुःसंयोगानन्तरम् प्रथमं पटत्वस्य ज्ञाने जाते ततो द्वितीयेन ज्ञानेन 'अयं पटः' इति पटत्वविशिष्टबुद्धिर्भवति।

विशेषण-विशेष्यभावावगाहि † ज्ञानं सविकल्पकम् (विकल्पेन सहितम्) ज्ञानम्। 'अयं घटः' 'सुन्दरो नरः' इत्यादि विशिष्टज्ञानं सर्व्वमेव सविकल्पकम्। द्वितीयप्रत्यक्षं सर्व्वदैव विशिष्टज्ञानमेव भवति। प्राथमिकेन निर्विकल्पकेन प्रत्यक्षेण अवगतस्य घटत्वादिसामान्यस्य घटादौ विशेषणतया प्रतीतौ बाधाभावात्। तृतीयन्तु प्रत्यक्षं प्रायशः विशिष्टवैशिष्ट्यावगाहि ‡ भवति। यथा 'कृष्णपशुपूर्णा पशुशाला', इति; अत्र कृष्णरूपविशिष्टस्य पशोः पशुशालायां सम्बन्धो भासते; 'दण्डिपूर्णो मठः' इति ज्ञाने दण्डविशिष्टस्य पुरुषस्य वैशिष्ट्यम् (सम्बन्धः) मठे प्रतीयते।

---

* एकस्मिन् अपरस्य विशेषणतया ज्ञानं विशिष्टबुद्धिः; विशिष्टबुद्धौ एकस्मिन् अपरस्य सम्बन्धः प्रतीयते, यथा 'अयं घटः,' 'सुन्दरो नरः' इत्यादौ घटे घटत्वस्य नरे सौन्दर्य्यगुणस्य विशेषणतया प्रतीतिः, सम्बन्धस्य च अवगमः।

† अवगाहनं, भासनं, भानं विषयीकरणम्, प्रकाशनञ्चेत्येते शब्दाः समानार्थकाः। सुतरां अवगाहते, भासते, भाति विषयीक्रियते प्रकाशते इति क्रियापदानामपि एकरूप एवार्थः।

‡ विशिष्टस्य विशेषणसम्बन्धस्य वैशिष्ट्यं सम्बन्धम् अवगाहते विषयीकरोति इति विशिष्टवैशिष्ट्यावगाहि।

विशिष्टज्ञाने एकम् विशेष्यम् अपरम् विशेषणं भवति। विशेष्यस्यैव उद्देश्यमिति नामान्तरम्; विशेषणस्य प्रकार इति। यथा 'सुन्दरी नरः' इत्यत्र नरो विशेष्यः सौन्दर्य्यम् प्रकारः। विशेष्ये प्रकारे च यद्विशेषणतया प्रतीयते, तत् यथाक्रमं विशेष्यतावच्छेदकम् प्रकारतावच्छेदकञ्च भवति। यथा 'मृण्मयोऽयं गिरिः आश्विने मासि मनोहरपुष्पसङ्गी भवति' इत्यादौ गिरौ विशेष्ये मृत्तिका गिरित्वञ्च विशेषणम्, मृत्तिकायाञ्च मृत्तिकात्वम् विशेषणं। ततश्च मृत्तिका गिरित्वञ्च विशेष्यतावच्छेदकम्; मृत्तिकात्वन्तु विशेष्यतावच्छेदकतावच्छेदकम्। एवम् मनोहरपुष्पसङ्गौ प्रकारे मनोहरपुष्पं विशेषणम्। तत्र च मनोहरत्वं पुष्पत्वञ्च विशेषणतया प्रतीयते इति पुष्पं प्रकारतावच्छेदकं; मनोहरत्वं पुष्पत्वञ्च उभयमेव प्रकारतावच्छेदकतावच्छेदकम्।

विशेष्ये विशेष्यता, प्रकारे च प्रकारता वर्त्तते। ते च परस्परं निरूप्यनिरूपकभावापन्ने,—विशेष्यतानिरूपिता प्रकारता भवति, प्रकारतानिरूपिता च विशेष्यतेति; एवं प्रकारता विशेष्यनिरूपिता भवति, विशेष्यता च प्रकारनिरूपिता भवति। एतत् सर्व्वम् वृत्तितावर्णनास्थले उक्तप्रायमेव।

विशेषणं द्विविधम्, सिद्धं साध्यं च। सिद्धम् पूर्व्वावगतम् विशेषणम्, विशेष्यस्य इतरेभ्यो व्यावर्त्तनाय विशेष्यान्तरा प्रयुज्यते। साध्यञ्च पूर्व्वमप्राप्तम् प्राधान्येन विधीयते। साध्यस्य विधेयमिति नाम। यथा 'दयादाक्षिण्यादिगुणैरलङ्कृतो जनकानुरक्तोऽयं रामः सर्व्वैर्नमस्यः' इत्यत्र विशेष्यस्य रामस्य दयादाक्षिण्यादिगुणैरलङ्कृतत्वं, जनकानुरक्तत्वञ्च पूर्व्वावगतम् इति सिद्धम् विशेषणम् इतरव्यावर्त्तनाय उद्देश्यमध्ये प्रयुक्तम्। नमस्यत्वन्तु पूर्व्वम् असिद्धमिति विधीयते। विधेयस्य विधानञ्च क्वचित् विशेष्यतावच्छेदकसामानाधिकरण्येन, क्वचिच्च विशेष्यतावच्छेदकावच्छेदेन भवति। यस्मिन् कस्मिन्नपि विशेष्ये यद्विधानं तत् विशेष्यतावच्छेदकसामानाधिकरण्येन (विशेष्यतावच्छेदकस्य समाने एकस्मिन् अधिकरणे वृत्तितया) विधानम्। यथा 'ब्राह्मणो विद्वान् भवति' इत्यनेन न सर्व्व एव ब्राह्मणा विद्वांसो भवन्ति'इति विधीयते, किन्तु 'यत्र यत्र ब्राह्मण्यं वर्त्तते तेषां मध्ये केषुचित् विद्या वर्त्तते' इति। यत्र यत्र विशेष्यतावच्छेदकम् वर्त्तते, तत्र सर्व्वत्रैव (अर्थात् सर्व्वस्मिन्नेव विशेष्ये) विधेयस्य विधानम् विशेष्यतावच्छेदकावच्छेदेन (विशेष्यतावच्छेदकस्य अवच्छेदेन व्याप्त्या) विधानम्। यथा 'मनुष्यो मरणशीलः' इत्यनेन न केषुचित् मनुष्येषु मरणशीलत्वम् विधीयते

किन्तु सर्व्वेष्वेव मनुष्येषु। मनुष्यत्वं व्याप्य सर्व्वेष्वेव मनुष्येषु मरणशीलत्वम् विधीयते इति।

विधेये मुख्यप्रकारता तिष्ठति ; मुख्यप्रकारतानिरूपिता विशेष्यता च मुख्यविशेष्यता भवति। विधेयभिन्ने या प्रकारता सा न मुख्या, एवं या च विशेष्यता मुख्यप्रकारतानिरूपिता न भवति सापि न मुख्यविशेष्यता। अतएव 'जनकानुरक्तोऽयं रामः पूज्यः' इत्यत्र पूज्यत्वरूपविधेयनिष्ठा प्रकारता मुख्या ; तन्निरूपितैव च रामनिष्ठा विशेष्यता मुख्या। जनकानुरक्तत्वरूपविशेषणनिष्ठा च प्रकारता न मुख्या ; सुतरां तन्निरूपिता रामनिष्ठा विशेष्यतापि न मुख्या।

पुनश्च ज्ञानं द्विविधम् ; निश्चयः संशयश्चेति। यत्र ज्ञाने एकस्मिन् विशेष्ये एकमेव,—तदेव तदभाव एव वा प्रकारतया भासते स निश्चयः। यस्मिन् तु पुनः एकस्मिन्नेव तत्-तदभावश्च उभयमेव भासते स संशयः; यथा 'अयं मनुष्यः' इति निश्चयः ; दीर्घोऽयं मनुष्यो नवा ? इति संशयः। पूर्व्वत्र एकमेव मनुष्यत्वं प्रकारः ; परत्र मनुष्यत्वम्, मनुष्यत्वाभावश्च उभयएव प्रकारः। संशये हि एकस्मिन् विशेष्ये प्रतियोगी अभावश्च परस्परविरुद्धावपि उभौ प्रकारतया भासते इति नियमः। तत्र भावाभावोभयप्रकारतानिरूपिता एकैव विशेष्यता भवति। यथा उक्ते उदाहरणे मनुष्यत्वनिष्ठा या प्रकारता या च मनुष्यत्वाभावनिष्ठा प्रकारता एतदुभयनिरूपिता एकैव विशेष्यता अस्मिन् दीर्घे विशेष्ये वर्त्तते। समूहालम्बनस्थले* तु प्रत्येकप्रकारतानिरूपिता पृथक् पृथक् विशेष्यता भवति इति संशयात् समूहालम्बनस्य भेदः। संशये प्रकारस्य 'कोटिः' इति नाम। 'अयं स्थाणुर्वा पुरुषो वा' इत्यादौ संशये कोटिचतुष्टयमस्ति—स्थाणुत्वम् स्थाणुत्वाभावः, पुरुषत्वम् पुरुषत्वाभावश्चेति। अतएवायं संशयः 'चातुष्कोटिक' इत्युच्यते। केचित्तु वदन्ति,—अत्रापि कोटिद्वयमेवास्ति,—स्थाणुत्वम् स्थाणुत्वविरुद्धपुरुषत्वञ्चेति। संशये च क्वचित् कोटिद्वयं समानम् भवति, क्वचिच्च

---

*यत्र एकस्मिन् विशेष्ये "एकत्र द्वयम्"-इति रीत्या बहूनि विशेषणानि प्रतीयन्ते, तज्ज्ञानं समूहालम्बनम् (समूहः (अनेके) आलम्बनं प्रकारतया विषयो यस्य तत्)। यथा 'वृक्षः कपिसंयोगी कपिसंयोगाभाववांश्च। इत्यस्मिन् ज्ञाने, एकस्मिन् वृक्षे कपिसंयोगः कपिसंयोगाभावश्च एकदैव विशेषणतया प्रतीयते ; अथच नायं संशयः। अत्र हि कपिसंयोगनिष्ठप्रकारतानिरूपिताद्वृक्षनिष्ठा एका विशेष्यता एका च कपिसंयोगाभावनिष्ठप्रकारतानिरूपितेति।

काचिदेका कोटिरुत्कटा भवति, 'आश्विने मासि वृष्टिरधिका भवति न वा' ? इति सन्देहे अधिकवृष्टेस्तदभावस्य वा बोधकम्, किमपि चिह्नमधुना नास्तीति नैकापि कोटिरुत्कटा। परन्तु 'भाद्रे मासि वृष्टिर्भवति न वा' इति संशये भाद्रमासस्य वर्षाकालतया वृष्टिकोटिरुत्कटा इत्ययं संशयः उत्कटैककोटिः, उत्कटैककोटिकः संशय एव सम्भावनेत्युच्यते। अतएव 'भाद्रे मासि वृष्टिर्भवति न वा' इति ज्ञानं सम्भावना इत्यलम्।

CALCUTTA
Dated the 1*st August*, 1891. } MAHES'ACHANDRA NYA'YARATNA.

[NOTE.—I have just learnt from an eminent Pandit of Navadwipa that Rámabhadra Siddhántavágisa, the commentator on *Kusumánjali* was not the person who set up the image of *Poḍámá* alluded to in p. 5., but that it was done by another person bearing the same name. There is no time now to ascertain the truth of the matter.]

M. N.

PRINTED AND PUBLISHED BY JADU NATH SEAL
HARE PRESS: 23-1, BECHU CHATTERJEE'S STREET, CALCUTTA.

